नं० ४४-६६-घ

रामनामाष्टोत्तरशतनामस्तोत्रम्

हिरण्यगर्भसंहितायाम्

नं० ४४९९-घ

4499

F = 3

ईश्वर अनंतदेवनी पोथी

॥ ॥श्रीगणेशाय नमः॥ ॥श्रीपार्वत्युवाच॥ ॥ॐ नमस्तेस्तु महादेव कैलाशगिरिवासिने
सर्वेषामुपकारार्थं मोक्षमार्गं प्रदर्शय॥१॥ ॥श्रीमहादेव उवाच॥ ॥रामचंद्रस्य माहात्म्यं
यदुक्तं ब्रह्मणा पुरा। तत्सर्वं कथयिष्यामि शृणु कल्याणदायिनि॥२॥ सर्वेश्वरः सर्वम
यः सर्वभूतहिते रतः। सर्वेषामुपकारार्थं निराकारो निरामयः। संनवत्येव लोकेस्मिन् सं
सारलयनाशनः। यदा यदा हि लक्षानां लयमुत्पद्यते तदा॥४॥ तदावतरति श्रीमान्नि
त्यरूपोप्ययं विभुः। मत्स्यकूर्मवराहादिरूपेण परमार्थहृत्॥५॥ तत्तत्कालेषु सर्वेषु सर्वे
षामुपकारकृत्। साधूनीसमविज्ञानानां लक्षानां लक्षवत्सलः॥६॥ उपकर्तुं निराकारः स
दाकारेण जायते। अजोयं जायते नंतो विष्णुतो द्भूत साधवः॥ तदा तदावतरते लक्षानामपु

कंपया॥ क्षीराब्धौ देवदेवेशो लक्ष्मीनारायणो विभुः। सशेषशंखचक्राभ्यां देवैर्ब्रह्मा
दिभिः सह॥ त्रेतायुगे दाशरथिरभून्नारायणो भुवि॥९॥ शेषोऽभूल्लक्ष्मणो लक्ष्मीर्जानकी
शंखचक्रके। जातौ भरतशत्रुघ्नौ देवाः सर्वेपि वानराः॥१०॥ आसीत्तुरैवसर्वेषां देवानां लयशा
तये। तत्र नारायणो देवः श्रीराम इति विश्रुतः॥११॥ सर्वलोकोपकारायन्मोक्षाय मवातरत्।
ध्यानमात्रेण देवेशो महापातकनाशनः॥१२॥ कीर्त्तनस्मरणात्स्यांरहत्याकोटिनिवारणः॥
कलौ संकीर्त्तनेनैव सर्वपापं व्यपोहति॥१३॥ रामरामेति रामेति ये वदंत्यपि पापिनः। पा
पकोटिसहस्रेभ्यस्तांस्तु उद्धरति नान्यथा॥१४॥ ॐ अस्य श्रीरामनामाष्टोत्तरशतनाम्नः ब्र
ह्मा ऋषिः॥ जानकीलक्ष्मणाः श्रीरामचंद्रो देवता॥ अनुष्टुप्छंदः॥ ॐ बीजं नमः शक्तिः॥

राम० २

श्रीरामचंद्र इतिकीलकं।श्रीरामचंद्रप्रीत्यर्थेजपेविनियोगः।ॐनमोभगवतेरामायपर
मात्मनेहृदयायनमः।ॐनमोभगवतेराजाधिराजायपंचाशद्वर्णात्मनेशिरसेस्वाहा।ॐनमो
भगवतेविद्याधिराजायहयग्रीवायशिखायैवषट्।ॐनमोभगवतेरघुनंदनायामिततेज
सेकवचायहुं।ॐनमोभगवतेश्रीरामचंद्रायजानकीवल्लभायनेत्रत्रयायवौषट्।ॐनमो
भगवतेह्रीरात्रिमध्यस्थायनमोनारायणायअस्त्रायफट्।इतिदिग्बंधेनमः।अथध्या
नं॥ ॥मंदाराकृतिपुण्यधामविलसद्वक्षस्थलंकोमलंशांतंकांतमहेंद्रनीलरुचिरा
भासंसहस्राननं।वंदेहंरघुनंदनंसुरपतिंकोदंडदीक्षागुरुंरामंसर्वजगत्सुसेवितपदंसी
तामनोवल्लभं॥१५॥इतिध्यानं॥ ॥ॐनमःसहस्रशिरसेतुभ्यंसहस्राक्षायतेनमः।नमःस

राम २

2

जनार्द्दननमस्तेस्तुनमोहनुमदाश्रय॥३१॥ उपेंद्रायनमस्तुभ्यंमारीचमर्द्दनायच॥ नमो
वलिप्रमथननमःसुग्रीवराज्यद॥३२॥ जामदग्न्यमहादर्पहारिणेहरयेनमः॥ नमोनमस्ते
कृष्णायनमस्तेभरताग्रज॥३४॥ नमस्तेपितृभक्तायनमःसौमित्रिपूर्वज॥ अयोध्याधिप
तेतुभ्यंनमःशत्रुघ्नसेवित॥३५॥ नमोवेदरहस्यायनमस्तेवेदयोनये॥ नमोवेदांतवेद्याय
ब्रह्मेशमुनिसेवित॥३६॥ नमोनित्यायशुद्धायबुद्धायसनातनप्रितो॥ डह्मतन्पायअहेतवेवा
गम्यायतेनमः॥ नमोयोगरहस्यायसुवर्णज्योतिषेनमः॥ अष्टोत्तरशतंनाम्नांरामचंद्रस्यपा
वेति॥३८॥ अतिगुह्यतमंपुण्यंरहस्यमतिदुर्ल्लभं॥ सर्वपापहरणंसर्वबाधानिकृंतनं॥३९॥
सर्वसौभाग्यजननंसर्वैश्वर्यप्रदायकं॥ अभीष्टफलदंदिव्यंसर्वलोकैकवश्यदं॥४०॥ वि

२०

ज्ञानदं सर्वभक्तानामज्ञानतिमिरापहं ॥ यः पठेत्प्रयतो लक्ष्म्या आवयेद्वा समाहितः ॥ ४१ ॥
सर्ववेदेषु तीर्थेषु दानेषु व्रततपस्सु च ॥ यत्फलं मुनिभिः प्रोक्तं तत्फलं समवाप्नुयात् ॥ ४२ ॥
पुण्यकालेषु सर्वेषु यः पठेत्सततं नरः ॥ पुनरावृत्तिरहितो वैकुंठे वासमाप्नुयात् ॥ ४३ ॥
॥ ॥ इति श्रीहिरण्यगर्भसंहितायां श्रीमहादेवप्रोक्तं श्रीरामनामाष्टोत्तरशतं स्तोत्रं समाप्तम् ॥ ॥ शुभमस्तु ॥ ॥ ॥ ॥ ॥ ॥ श्रीजानकीनाथो विजयते ॥ ॥

दीनानाथ ज्ञानानि पोथी

राम
८